CS (MAIN) EXAM, 2011

**Serial No.** [ ] **F–DTN–L–SAD–Q**

# SANSKRIT

**(Compulsory)**

*Time Allowed : Three Hours* | *Maximum Marks : 300*

## INSTRUCTIONS

*Candidates should attempt **ALL** questions.*

*The number of marks carried by each question is indicated at the end of the question.*

*Answers must be written in **Sanskrit** (Devanagari Script) unless otherwise directed.*

*Prescribed word limit must be followed for Q. No. 3. The precis must be attempted **only** on the special precis sheets attached to this question paper. These precis sheets are to be carefully detached from the question paper and securely attached to the answer book.*

1. अधस्तनानामेकमधिकृत्यानुमानतः **त्रीणि शतानि** शब्दान्वलम्ब्य एको निबन्धो लेखनीयः :— 100

   (i) राजनीतिः व्यक्तिगतनैतिकतायाश्च प्रश्नः।

   (ii) सामाजिकोन्नतेर्मुख्यः प्रेरकः कः — धर्म उत विज्ञानम् ?

   (iii) समेभ्यो भोजनम् : अस्माकं प्रजातान्त्रिकप्रणाल्यै एकमाह्वानम्।

   (iv) वेगस्य संस्कृतिः त्वरामपराधवृत्तिं च जनयति।

   (v) कृत्रिमबुद्धिर्मानवबुद्धेर्विकल्परूपे।

2. अधस्तनो गद्यांशो भवद्भिः सूक्ष्मेक्षिकया पठनीयः, अन्ते च पृष्टानां प्रश्नानामुत्तराणि सम्यक् संक्षिप्तभाषायाञ्च प्रदेयानि :—

6×10=60

वयमौद्योगीकरणस्यैकया तीव्रप्रक्रियया भ्रमामः, स्वोद्योगेषु च वयम्महत्संख्यायां जनान् नियोजयामः। भारते काचिद् ईदृशी धारणा दृश्यते यद् भवान् यद् विशेषकार्यं कर्त्तुं वाञ्छति तद्विषये कियज्जानाति नैतन्महत्त्वपूर्णम्, एतस्मान्महत्त्वपूर्णमिदमस्ति यद् भवान् केन परिचितः, येन व्यवसायप्राप्त्यर्थं प्रभावोपयोगः कर्त्तुं शक्येत। नेदं विचारयन्ति जना यच्छोभनपरिणामार्थं योग्यताऽऽवश्यकी। अस्माकं शिक्षायामुत्कृष्टताया विकासाय एकं सुनिश्चितं महत्त्वपूर्णं स्थानं वर्तते, यदि चेदुत्कृष्टताया विकासो महत्त्वहीनं गण्यते, तदाऽनेन योग्यताया अवमानना जायते। अनेनैकत्रास्माकं शिक्षा-प्रणाली विषाक्ता दूषिता च भवति, अपरत्र च सामाजिकशिक्षायै आन्दोलनारम्भेच्छा नश्यति।

यदा कस्यापि सेतोर्निर्माणमथवा राजमार्गस्य निर्माणं क्रियते तदा बालुका-लेप-चूर्णादीनामुचितमिश्रणार्थमेकस्य निश्चितानुपा-तस्यानुसरणं विधीयते, येन सेतु-राजमार्गयोर्निर्माणं समीचीनं जायेत दीर्घकालस्थितिश्च भवेत्। परमस्माकमनुभवोऽस्मिन् विषयेऽस्मानधःपतनस्यैव कथां श्रावयति, वयञ्चावगच्छामो यत्कस्मिंश्चिद्बन्धे गृहरन्ध्रं जातं, कश्चन राजमार्गश्च वर्षर्तौ प्लावितः।

विषयोऽयं गुणवत्तानियन्त्रणेन संयुक्तो यस्य सम्बन्धो न केवलं भौतिकसामग्र्याऽपितु जनैस्तेषाञ्चोत्तरदायित्वविषयक-बोधेनाप्यस्ति।

दुर्भाग्यवशात् अस्माकं प्रजातान्त्रिकव्यवस्थायां काश्चन एतादृश्यः परिस्थितय उत्पाद्यन्ते यासु योग्यता व्यवस्थितरूपेणैकेन उपेक्ष्यते, जनाश्चैवं कथयन्तः श्रूयन्ते यदस्मिन्देशे नास्ति गुणानां किमपि महत्त्वम्। अनेन भावनेयं समुदेति यदत्र योग्यतां, कार्यक्षमतां नैतिकमौचित्यञ्चावमत्यापि किमपि लोकसेवायाः पदं प्राप्तुं शक्यते, सार्वजनिकञ्च कार्यं कर्त्तुम्पार्यते।

प्रश्ना :—

(i) देशेऽस्मिन् समीचीनव्यवसायावाप्त्यर्थं जनाः किं विचारयन्ति ?

(ii) कदा वयं योग्यतान्नादरपूर्वकं पश्यामः ?

(iii) योग्यताम्प्रत्यसम्मानस्य को दुष्परिणामः ?

(iv) यदा वयमन्येषामुत्तरदायित्त्वबोधस्यासम्मानं कुर्मः, तदा कः परिणामः ?

(v) योग्यतां, कार्यक्षमतामुत्तरदायित्वञ्च प्रत्युपेक्षायाः किं कारणम्प्रतीयते ?

(vi) गद्यांशे रेखाङ्कितपदानामर्थं स्वभाषया प्रकटयत।

3. अधस्तनगद्यांशस्य संक्षेप : अनुमानतः **190—210** शब्देष्वेव लेख्यः। एतदर्थं प्रदत्तेषु विशेषसंक्षेपण-प्रष्ठेष्वेव संक्षेपः लेखनीयः। निर्धारितशब्दसीम्नि लेखनेऽसाफल्ये अङ्कक्षतिः सुनिश्चिता। यदिचेत् संक्षेपणं **150** शब्देभ्यो न्यूनं **250** शब्देभ्यश्चाधिकम्भविता तदा तदर्थं शून्यमपि प्रदातुं शक्यते। 60

अहन्तदाऽनुमानतः सप्तवर्षदेशीय आसम्, यदा मम पितृमहोदया राजस्थानिकन्यायालयस्य सदस्यतामवाप्तुं पोरबन्दरनगरात् राजकोटनगरं समायातः। तत्राहं एकस्मिन् प्राथमिकविद्यालये प्रावेशितः,

अहं तानि दिनानि सम्यक्तया स्मरामि, ममाध्यापकानान्नामानि तेषां वैशिष्ट्यानि च स्मरामि। यथाऽहं पोरबन्दरनगरे आसम् तथैवात्रापि, न किमप्युल्लेखनीयम्ममाध्ययनविषये। अहन्तु केवलम्-मध्यम-वर्गीयश्छात्र आसम्। विद्यालयादस्मादहमेकमुपनगरीयं विद्यालयं जगाम, ततश्च एकमुच्चतरविद्यालयम्। तदाऽहं द्वादशवर्षीयः समभवम्। नाहं स्मरामि यदस्मिन् स्वल्पकालेऽहं कदापि स्वाध्यापकान् सहपाठिनश्च मिथ्याभाषणमकरवम्। अहमतीव सङ्कोची, सर्वविधजनेभ्यश्च दूर एवासम्। मम पुस्तकानि मम पाठाश्चैव ममैकमात्रं मित्राणि आसन्। उचितसमये विद्यालये, अनन्तरञ्च गृहागमनम्—अयमेव मम स्वभाव आसीत्। अहं वस्तुतः प्रत्यावर्तने धावन्नेवायामि स्म यतो हि नाहं केनापि वार्त्तालापं कर्त्तुमशक्नुवम्। इदमपि भयमासीत् यत्कदाचित् कोऽपि माम् नोपहसेत्।

एका एतादृशी घटनाऽस्ति या मम उच्चतरकक्षायाः (High School) प्रथमवर्षस्य परीक्षासमयेऽघटत या च उल्लेखनीया। शिक्षानिरीक्षकः जाइल्समहोदयः निरीक्षणाय अभ्यागत आसीत् वर्तनी-अभ्यासार्थं सोऽस्मान् पञ्चशब्दान् लिखितुमादिदेश। एषामेकः शब्दः कैटिल **'Kettle'** आसीत्। मया एतस्य वर्तनी अशुद्धा लिखिताऽऽसीत्। ममाध्यापकः स्वपादत्राणकोणेन तत्संशोधयितुं संकेत-प्रदानाय प्रयत्नं चकार, परन्नाहं सहायतां वाञ्छामि स्म। वार्तेयं मम बुद्धेः पराऽऽसीत् यत्स वाञ्छति स्म यदहं स्वसमीपवर्तिछात्रस्य पट्टिकातो वर्तनीमनुकुर्याम्, यतो हि अहं विचारयामि स्म यद् अध्यापकोऽत्रास्मान् शब्दचौर्यकर्मणो वारयितुमेव निरीक्षते। परिणामोऽयमभूत् यन्मामतिरिच्य सर्वैरपि छात्रैर्लिखितस्य प्रत्येकपदस्य वर्तनी शुद्धाऽऽसीत्। अहमेव केवलं मूर्खः आसम्। अनन्तरं शिक्षकमहोदयः ममेदम्मौर्ख्यं मां बोधयितुं प्रयेते, परन्न तस्य कोऽपि प्रभावो ममोपरि जातः। नाहम् अनुकरणस्य कलां कदाप्यजानाम्।



(Contd.)

तथाप्यनया घटनया मम स्वाध्यापकं प्रति सम्माने न काऽपि क्षतिर्जाता। स्वभावेनैवाहं नान्येषामवगुणान् पश्यामि स्म। अनन्तरमहं एषामध्यापकमहोदयानामन्यानेकदुर्बलता अजानाम्, किन्तु तान् प्रति मम सम्मानं तथैवासीत्। अस्य कारणमिदमासीत् यन्मया वृद्धानां आपालनं शिक्षितमासीत् न तु तेषां कृत्यविश्लेषणम्।

द्वेऽन्ये घटनेऽस्यैव कालस्य सदैव मम स्मृतौ अवर्तताम्। विद्यालयाय निर्धारितपुस्तकान्यतिरिच्य किमपि पठने मम सदैवारुचिरवर्तत। प्रतिदिनस्य निर्धारितमध्ययनं तु करणीयमेवासीत्, यतो ह्यहं अध्यापकेन दण्डं तथैव नाभिनन्दामि स्म यथा तैर्वञ्चना। एतस्मात्कारणादहं अन्यमनस्कः सन् स्वपाठान् पूर्णतया पठामि स्म। एवं मम पाठा एव यदा पूर्णा नाभवन् तदाऽतिरिक्ता-ध्ययनस्यावकाश एव नासीत्। परं मम पित्रा क्रीतमेकं पुस्तकमहमपश्यम् कथमपि। तत्पुस्तकमासीत् — 'श्रवणपितृभक्तिनाटकम्' (श्रवणस्य तत्पितरौ प्रति भक्तिभावविषये नाटकम्)। अहं तन्महता मनोयोगेनापठम्। तदैवास्माकं गृहं केचन यायावरप्रकृतिका अभिनेतारः समागच्छन्। यानि चित्राण्यहमपश्यम् तेषामेकं श्रवणस्यासीत्, यः स्वस्कन्धयोः स्थितस्य स्यूतस्य साहाय्येन स्वदृष्टिहीनौ पितरौ तीर्थयात्रार्थं वहति स्म। अनेन पुस्तकेन चित्रेण च मम मनसि महत्प्रभावो जनितः। अहं स्वमवदम् 'इदमेतादृशमुदाहरणं यत्त्वयाऽनुकरणीयम्'। श्रवणस्यावसाने तत्पित्रोः करुणरोदनं मम स्मृतावद्यापि नूलमिव। तस्य द्रवितकतृध्वनिः माम् गहनतया प्रभावयांचकार, इमं चाहं स्वपित्रा मदर्थं क्रीते वाद्ययन्त्रे संक्रीडयामास।



(Contd.)

4. निम्नगद्यांशस्य संस्कृतभाषायामनुवादो विधेय :— 20

Tulasidas's imagery covers a vast range. No poet of medieval period — not even his great contemporary Surdas — can vie with Tulasidas in respect of the infinite variety of imagery employed by him. He has collected his images from peasant life, court life, priestly environments, rural and civic life, philosophical treatises, literary classics, mythological works and folk literature. His poetry is a vast gallery of all kinds of images ranging from exquisite miniature paintings to large frescoes. Normally he likes simple and integrated images, but is quite capable of creating complex imagery as well. What he seems to abhor is a truncated image of which we can hardly search out a single example. His whole poetic creation is an endless endeavour to give a concrete tangible form to the abstract — to impart physical charms and mental qualities of human personality to an absolute concept. Actually the very conception of Personified Godhood is a grand exercise in image-making. In this context, what is of special relevance to the modern reader in Tulasidas's art is his unconventional approach to literary-cultural tradition and religion. A number of poets in other Indian languages have also produced great literature in this regard, but Tulasi appears to have surpassed them all.

5. निम्नलिखित संस्कृत गद्यांशस्य आंग्लभाषायामनुवादः करणीय :— 20

सर्वविदितमेतद् यद् विश्वस्य निर्माणं, विकासो रक्षणञ्च प्रकृतावेवाश्रितानि, प्रकृतेश्च निर्माणे रक्षणे च वृक्ष-वन-लता-पादप-गुल्म-तृणानाम्महन्महत्त्वमस्ति। वस्तुतो मानवस्यास्तित्वमेव वृक्षेषु वनेषु च स्थितमस्ति। वृक्षा एव मृत्तिकायाः प्रमुखा रक्षकाः। ते प्रभञ्जनानां वेगान् वारयन्ति, मृत्तिकाञ्च समुत्पतनाद् वारयन्ति। वृक्षा एव पर्वतानां क्षरणावरोधने तांश्च स्थिरीकरणे क्षमाः। वनैरेव पशुपक्षिणां रक्षा भवति पारिस्थितिकीसंरक्षणञ्च सम्भवम्। त एव वर्षायाः कारणभूताः। यत्र वृक्षाणां बाहुल्यं तत्रैव वर्षाधिक्यम्, परन्तु मरुस्थलं वर्षार्थमवसीदति। वर्षयैवान्नोत्पादनं सम्भवम्, अन्नेन च मानवः जीवति। अनेकवृक्षाणां पत्राणां घासरूपे भक्षणं कृत्वा पशवो जीवन्ति। वृक्षैरेव वयं इन्धनं भवननिर्माणार्थञ्च काष्ठं प्राप्नुमः। वाष्पयान-जलयान-वायुयानाद्यनेकसाधन-निर्माणे वृक्षेभ्योऽवाप्तं काष्ठमेव प्रयुज्यते। विविधौषधानां, श्यानद्रव्यस्य, लेखनपत्रस्य, ज्वलनशलाकायाः, विभिन्नतैलानां, अनेकविधस्वादिष्टपौष्टिकफलानामक्षुण्ण-स्रोतरूपा वृक्षा एव। पादपानां शीतलच्छायाऽस्मभ्यं ग्रीष्मतापात्सुखं प्रददाति। एषां पुष्पाणां सुगन्धोऽस्माकम्मनांसि नवीकरोति।

6. (क) अधोलिखितपदानां स्वरचितवाक्येषु प्रयोगं कुरुत :— 20

(i) मह्यम्

(ii) अद्य

(iii) श्वः

(iv) ह्यः

(v) यामि

(vi) यथेच्छम्

(vii) यथाशक्ति

(viii) रामाय

(ix) अहो

(x) धन्या।

(ख) अधोलिखितवाक्यानि शुद्धीकुरुत :— 20

(i) उभौ न विजानाति।

(ii) कृष्णं नमः।

(iii) मामिदं प्रयच्छ।

(iv) सः ग्रामेण आगच्छति।

(v) भवान् क्व निवससि ?

(vi) ममापणः कर्णपुरेऽस्ति।

(vii) भवज्जननी क्व गतः ?

(viii) कस्यायं हस्तकौशलम् ?

(ix) कुतः समायाता भवान् ?

(x) अहं त्वया पृच्छामि।

Sr. No. [ ]

**F–DTN–L–SAD–Q**

अपना अनुक्रमांक इन पत्रकों पर न लिखें

DO NOT WRITE YOUR ROLL NO. ON THESE SHEETS

# SANSKRIT
# (Compulsory)

सार लेखन के लिए विशेष पत्रक

**SPECIAL SHEETS FOR PRECIS**

इस पत्रक के दोनों ओर लिखिए। प्रत्येक खण्ड में एक शब्द और प्रत्येक पंक्ति में पांच शब्द लिखिए। अपने उद्धरण में सामान्य रूप से विराम आदि चिन्ह लगाइए और यदि आवश्यक हो तो प्रत्येक पैराग्राफ के अन्त में एक पंक्ति खाली छोड़ते हुए इसे पैराग्राफों में विभक्त कीजिए। यदि चाहें तो उत्तर-पुस्तिका के साधारण कागज पर पहले एक कच्चा प्रारूप तैयार कर सकते हैं। अपनी उत्तर-पुस्तिका दे देने से पहले कच्चे कार्य को आर-पार पंक्ति डालकर काट दिया जाना चाहिए। आप सारपत्रक को अपनी उत्तर-पुस्तिका के अन्दर सुरक्षित रूप से बांध दीजिए।

**Use both sides of this sheet. Write one word in each division and five words in each line. Punctuate your passage in the usual way and divide it into paragraphs, if necessary, leaving a line blank at the end of each paragraph. You may make a rough copy first, if you so wish, on ordinary paper in the answer-book. The rough work should be scored through before you hand over your answer-book. You should fasten the precis sheet securely inside your answer-book.**

| शीर्षक<br>Title | | | | | इस हाशिए<br>में न लिखें<br>Do not write on<br>this margin |
|---|---|---|---|---|---|
| | | | | | 10 |
| | | | | | |
| | | | | | 20 |
| | | | | | |
| | | | | | 30 |
| | | | | | |
| | | | | | 40 |
| | | | | | |
| | | | | | 50 |
| | | | | | |
| | | | | | 60 |
| | | | | | |

[कृ.पृ.उ./P.T.O.]

| | | | | | |
|---|---|---|---|---|---|
| | | | | | 70 |
| | | | | | 80 |
| | | | | | 90 |
| | | | | | 100 |
| | | | | | 110 |
| | | | | | 120 |
| | | | | | 130 |
| | | | | | 140 |
| | | | | | 150 |
| | | | | | 160 |
| | | | | | 170 |
| | | | | | 180 |

| | | | | | |
|---|---|---|---|---|---|
| | | | | | 190 |
| | | | | | 200 |
| | | | | | 210 |
| | | | | | 220 |
| | | | | | 230 |
| | | | | | 240 |
| | | | | | 250 |
| | | | | | 260 |
| | | | | | 270 |
| | | | | | 280 |
| | | | | | 290 |
| | | | | | 300 |